त्रिनेत्रा, स्त्री, (त्रीणि नेत्राणीव शरीरे यस्याः ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥ नेत्रत्रययुक्ता च ॥

त्रिपताकं, क्ली, (तिस्रः पताका इव रेखा यत्र ।) रेखात्रयाङ्कितभालम् । इति हारावली ।११४॥ (तिस्रः पताका इव अङ्गुलयो यत्र । त्रिपताकलक्षणान्विते हस्ते, पुं । यथा, साहित्यदर्पणे । ६ । १५४ ।

"त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते तज्जनान्तिकम् ॥"

"यः कश्चिदर्थो यस्माद् गोपनीयस्तस्यान्तरत ऊर्द्ध्वं सर्व्वाङ्गुलिनामितानामिकं त्रिपताकलक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तत् जनान्तिकम्॥")

त्रिपत्रं, क्ली, (त्रीणि त्रीणि पत्राणि यत्र ।) दलत्रययुक्तविल्वपत्रम् । यथा,—

विष्णुरुवाच ।
"ऊर्द्धपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम् ।
अहं दक्षिणपत्रञ्च त्रिपत्रदलमित्युत ॥"
इति वृहद्धर्म्मपुराणे विल्वपत्रमाहात्म्ये ११ अध्यायः ॥

त्रिपत्रः, पुं, (त्रीणि त्रीणि पत्राणि यस्य ।) विल्वः । इति राजनिर्घण्टः ॥ पत्रत्रये, क्ली ॥

त्रिपत्रकः, पुं, (त्रीणि त्रीणि पत्राणि यस्य ।) पलाशवृक्षः । इति हेमचन्द्रः । ४ । २०२ ॥ (त्रयाणां पत्राणां समाहारः । ततः कन् । तुलस्यादि पत्रत्रये, क्ली । यथा, देवीपुराणे ।
"तुलसीकुन्दमालूरपत्राण्याहुम्बिपत्रकम् ॥")

त्रिपथं, क्ली, (त्रयाणां पथां समाहारः । "ऋक्पूरिति ।" ५ । ४ । ७४ । इत्यः ।) त्रिमार्गम् । तेमाथा - पथ इति भाषा । तत्पर्य्यायः । त्रिकम् २ । इति हेमचन्द्रः । ४ । ५२ ॥

"शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे ।
विल्वधात्रीद्रुमस्यान्ते त्रिपथे वा भजेन्निशि ।
स भवेत् सर्व्वसिद्धीशः सर्व्ववेदविदां वरः ॥"
इति गुप्तसाधनतन्त्रम् ॥

(तिसृणां नाडीनां पन्थाः । इति विग्रहे कपालकुहरे, पुं । यथा, हठयोगप्रदीपिकायाम् ।३।३७।
"कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत् ।
सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते ॥")

त्रिपथगा, स्त्री, (त्रिपथे स्वर्गमर्त्त्यपातालमार्गे गच्छतीति । गम + डः ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥ (अस्या निरुक्तिरुक्ता यथा, रामायणे । १ । ४३ । ६ ।
"गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च ।
त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता ॥")

त्रिपदा, स्त्री, (त्रयः पादा मूलानि यस्याः । टापि पादस्य पद्भावः ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"गोधापदी तु सुवहा त्रिपदा हंसपद्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥

(त्रयः पादाक्षराणि यस्याः । त्रिपादयुक्ते, त्रि । यथा, मनुः । २ । ८१ ।
"ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")

त्रिपदिका, स्त्री, (त्रयः पादा अस्याः इति त्रिपदी ततः संज्ञायां कन् ततष्टाप् ।) अर्घ्यार्थधातुनिर्म्मितत्रिपादयुक्तशङ्खाधारः । इति तन्त्रसारः ॥ ("तत्र त्रिपदिकामारोप्य तदुपरि शङ्खं स्थापयेत् ।" इति पूजापद्धतिः ॥)

त्रिपदी, स्त्री, (त्रयः पादा अस्याः । ङीपि पद्भावः ।) गोधापदी । इति रत्नमाला ॥ हस्तिगात्रबन्धः । इति हेमचन्द्रः ।४।२६६ ॥ (हस्तिपादबन्धनम् । इति यादवः ॥ यथा, रघुः । ४ । ४८ ।
"नास्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥")
त्रिपादयुक्ता । पदत्रयम् । इति व्याकरणम् ॥ भाषाकवितायाश्छन्दोविशेषः । यथा,—
"पञ्झटिकान्ता यदि यमकान्ता
द्वादश परिणतमात्रा ।
किन्नरगीतिः तदिति निवीतिः
स्याद्धंसमाचरणान्ता ॥"
स्वपादान्त उदाहृतः ।
"येषा सङ्गीतके नित्यं निवीतिः किन्नराख्यिका ।
सैव स्यात् प्राकृते गाने त्रिपदीति परिश्रुता ॥"
इति काव्योदयः ॥
(त्रिषु मार्गेषु पादो गमनं यस्याः । गङ्गा । यथा, काशीखण्डे । २६ । ७६ ।
"त्रैलोक्यलक्ष्मीस्त्रिपदी तथा तिमिरचन्द्रिका ॥")

त्रिपर्णः, पुं, (त्रीणि त्रीणि पर्णानि यस्य ।) पलाशः । इति राजनिर्घण्टः ॥

त्रिपर्णिका, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः । संज्ञायां कन् । टापि अत इत्वञ्च ।) कन्दविशेषः । तत्पर्य्यायः । वृहत्पत्रा २ छिन्नग्रन्थिनिका ३ कन्दालुः ४ कन्दबहुला ५ अम्लवल्ली ६ विदारुहा ७ त्रिपर्णी ८ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । श्वासकासविषव्रणविनाशित्वम् । पित्तप्रकोपशमनत्वञ्च । इति राजनिर्घण्टः ॥

त्रिपर्णी, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः । गौरादित्वात् ङीष् ।) शालपर्णी । इति भावप्रकाशः ॥ (अस्या गुणा यथा,—
"यातुकः शालकल्याणी त्रिपर्णी पीलुपर्णिका ।
शाकञ्जुक्रं च रूक्षञ्च प्रायो विष्टभ्य जीर्य्यति ।
मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम् ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)
वनकार्पासी । पृश्निपर्णीभेदः । इति रत्नमाला ॥

त्रिपात्, [द्] पुं, (त्रयः पादा अस्य । "संख्यासुपूर्व्वस्य ।" ५ । ४ । १४० । इति पादस्यान्तलोपः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (वेदादिमते संसाररहितो ब्रह्मस्वरूपः पुरुषः । यथा, ऋग्वेदे । १० । ९० । ४ ।
"त्रिपादूर्द्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ॥"
पुराणादिमते वामनावतारे त्रिपात् भूत्वा बलिसकाशात् सर्व्वं राज्यादिकं गृहीतवानित्यतोऽस्य तथात्वम् । तथाच भागवते ।८।२०।३४।
"क्षितिं पदैकेन बलेर्विचक्रमे
नभः शरीरेण दिशश्च बाहुभिः ॥
पदं द्वितीयं क्रमतस्त्रिविष्टपं
न वै तृतीयाय तदीयमण्वपि ।
उरुक्रमस्याङ्घ्रिरुपर्य्युपर्य्यथो
महर्जनाभ्यां तपसः परं गतः ॥")
ज्वरः । यथा,—
"विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥"
इति श्रीभागवतम् ॥

त्रिपादिका, स्त्री, (त्रयः पादाः मूलानि यस्याः । कप् ततष्टापि अत इत्वम् ।) हंसपदीलता । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"हंसपादी हंसपदी कीटमाता त्रिपादिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

त्रिपिष्टपं, क्ली, (त्रिदशानां देवानां पिष्टपं वासस्थानम् । पृषोदरादित्वात् दशशब्दस्य लोपः । यद्वा, मर्त्त्यपातालापेक्षया तृतीयं पिष्टपम् भुवनम् । वृत्तौ त्रिशब्दस्य त्रिभागवत् पूरणार्थता ।) स्वर्गः । इत्यमरः । १ । १ । ६ ॥ (यथा, महाभारते । १ । २०८ । ३५ ।
"तत् त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत ॥")
आकाशम् । इति शब्दरत्नावली ॥

त्रिपिष्टपसत्, [द्] पुं, (त्रिपिष्टपे स्वर्गे सीदतीति । सद + क्विप् ।) देवता । इति हलायुधः ॥

त्रिपुटः, पुं, (त्रीणि पुटानि यस्य ।) सतीलकः । तीरम् । इति मेदिनी । के, ४५ । हस्तभेदः । तालकः । इति शब्दरत्नावली ॥ गोक्षुरवृक्षः ॥ इति रत्नमाला ॥ (कलायविशेषः । खेसारी इति भाषा ॥ अस्य पर्य्याया गुणाश्च यथा,—
"त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तद्गुणा अथ ।
त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् ॥
कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा ।
किन्तु खञ्जत्वपङ्गुत्वकारी वातातिकोपनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"अन्यानि चैव शस्तानि कौलत्थान्युषितानि च ।
मसूरास्त्रिपुटा वल्याः कलायाद्याश्च वर्ज्जिताः ॥"
इति हारीते प्रथमे स्थाने नवमेऽध्याये ॥)

त्रिपुटा, स्त्री, (त्रीणि पुटानि दलवृत्तयो यस्याः ।) मल्लिका । सूक्ष्मैला । त्रिवृत् । इति मेदिनी । के, ४५ ॥ कर्णस्फोटा । स्थूलैला । रक्तत्रिवृत् । इति राजनिर्घण्टः ॥ देवीविशेषः । यथा,—
"ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः ।
त्रिपुटाख्या ह्रिरक्तैस्त्रैर्व्वीजैरङ्गानि षट् क्रमात् ॥"
अस्या रूपं यथा,—
"पारिजातवने रम्ये मण्डपे मणिकुट्टिमे ।
रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते ॥
अधस्तात् कल्पवृक्षस्य निषण्णां देवतां स्मरेत् ।